श्रीगणेशाय नमः ॥ आनंदैकनिधिं देवमंतरायतमोरविं दयायानिलयं वंदे वरदं द्विरदाननं १ वाग्देवतायाश्चरणारविंदमानंदसांद्रे हृदि संनिधाय श्रीपुंजराजः कुरुते मनोज्ञां सारस्वतव्याकरणस्य टीकां २ इह ग्रंथस्य कर्त्ता निरंतरायमीप्सितार्थसिध्यै शिष्टाचारप्रतिपादनाय इष्टदेवतानमस्काररूपमंगलाचरणपूर्वकं श्रोतृप्रतिपत्तिद्वारा प्रयोजनं चिकीर्षितं प्रतिजानीते प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तरां १ तत्र परमात्मानं प्रणम्य बालधीवृद्धिसिद्धये नातिविस्तरां सारस्वतीं क्रियां ऋजुं कुर्वे

इत्यन्वयः ॥ प्रक्रियंते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यंते शब्दा अनेनेति प्रक्रिया सारस्वतस्य प्रणीताया प्रक्रिया सारस्वती ॥ तां सारस्वतीं प्रक्रियां ऋजुं प्रयोगानुकूलसूत्रक्रमां कुर्वे ॥ प्रकृतयालि सूत्रपाठक्रमेणार्जवमुपयाति ॥ अनतस्तत्क्रममुत्सृज्य यत्रैतत्रस्थि ... नातिविस्तरां तानां सूत्राणामेकत्वेन ऋजुं कुर्वे इत्यर्थः ॥ किंलक्षणां सारस्वतीं प्रक्रियां ॥ नातिविस्तरां ॥ अ एतेन ग्रंथबाहुल्यमेव निरस्तं नार्थबाहुल्यं ॥ सर्वमेव तु विस्तरः ... ॥ परमात्मानं प्रणम्येत्यपदाबव्यर्थे सुगमं भवति ॥ किं कृत्वा ॥ ऋजुं कुर्वे इत्यत्राह ॥ २ परमात्मानं प्रणम्य सजगेद्धापको निष्ठुरेव ॥ प्रति ॥ अननीयात्मा ॥ परमश्चासावात्मा च परमात्मा ॥ सजगेद्धापको ... तं प्रणम्य ॥ अकर्मणकायवाङ्मनात्मा परमात्मा चेति सहस्रनाममध्ये पठितत्वात् ॥ तं प्रणम्य ॥

नोमि नेता ।। अत्र प्रकर्षवाचिनः शब्दस्य प्रथमं प्रयोगो मंगलार्थश्चापि लक्ष्यते ।। मंगलाचरणं
तु शिष्टाचारमूलं ।। यथा नित्ये शब्दार्थसंबंध इति वृत्त्ये सिद्धे शब्दार्थसंबंध इत्याह ।। स को
सापनः ।। तथा च वृद्धिरादैजित्यत्र वृद्धिशब्दमादौ प्रयुक्तवान् पाणिनिः ।। एवमिहापि प्रथा
दौ प्रशब्दप्रयोगः ।। बालधीवृद्धिसिद्धये ।। इति बलंति चलंति दुर्बोधादर्थादिति बालाः
अव्युत्पन्नाः ।। तेषां धीवृद्धिर्व्युत्पत्तिः तस्याः सिद्धिर्निष्पत्तिः ।। तस्यै सारस्वतीं प्रक्रियां कुर्वे
कुर्वे इत्यतिवाक्यार्थः ।। बालव्युत्पादकस्य ग्रंथस्यास्य परार्थत्वेपि तन्निर्माणसमुत्पन्न
सुकृतरूपस्य फलस्य आत्मगामित्वात् कुर्वे इत्यात्मनेपदप्रयोगो युक्त एव ।। नातिवि
स्तरां मिति नाकादित्वात् नञो नलोपाभावः ।। अथवा न इति नञ् निषेधार्थो निपा
तः ।। तेन सह सुप्सुपा समासः ।। अरण्यानीस्थाने फलं न मिलतीति नैकद्रुमवन्मिसादिप्रयोगदर्श

नात् ।। केचित्तु नेति पृथक्पदमेव मन्यंते ।। अत्र केसरस्वत्या प्रणीतानि सूत्राणि सारस्वतानि
तत्संबंधिनी सारस्वतीति व्युत्पत्तिमाश्रयंते ।। इति व्याख्यानं दृष्ट्वा इति छंदसयोर्दुर्निवारः
स्यात् ।। अतः तन्मते छप्रत्ययस्य दुर्निवारत्वादुपेक्षणीयं ।। तथा सति सरस्वती येन भ
वितव्यं ।। बालानां धीः बालधीः तस्याः सिद्धिरिति विग्रहे ।। तादृश्या एव मूढधियो वृद्धिर्नो
भवेत् ।। तस्मात् बालानां धीवृद्धिर्व्युत्पत्तिरित्येव युक्तं ।। अत्र ऋजुत्वं विधेयं ।। अथ नवीनामे
व सारस्वतीसमाख्यां प्रक्रियां कुर्वे इति केचिदाहुः ।। तन्मते सूत्रसमस्तु[illegible]तीयस्मै
दत्तो साक्षात्सरस्वती ।। अनुभूतिस्वरूपाय तस्मै श्रीगुरवे नम इति नागेंद्रपुरीश्वर
तेरुक्तत्वात् ।। एतद्धि विरोधः स्यात् ।। तस्माद्यथाभिहितमेव साधय ।। तेन बालधीवृ

द्धिः प्रयोजनं॥ हेतुहेतुमद्भावः संबंधः॥ जिज्ञासुरधिकारी इति विषयाद्यनुबंधचतुष्टयं
वेदितव्यं॥ ननु विस्तारः कथं निरस्तो यस्मिन् सति साकल्येन शब्दज्ञानं स्यात्॥ इति शंका
मुपाकर्तुमाह॥ इंद्रादयोपि यस्यांतं न ययुः शब्दवारिधेः॥ प्रक्रियां तस्य कृत्स्नस्य क्ष
मो वक्तुं नरः कथमिति॥ इंद्रः चंद्रः काशकृत्स्नपिशली शाकटायनः॥ पाणिन्यम
रजैनेंद्रा इत्यष्टौ व्याकरणा॥ अपि यस्य शब्दवारिधेः शब्दसमुद्रस्य॥ वारीणि धीयंते
यस्मिन्निति वारिधिः समुद्रः॥ तस्यापारं अंतं इयत्ता यापि परिच्छेदं वा न ययुः॥ न प्रापुः
तस्य कृत्स्नस्य समग्रस्य प्रक्रियां वक्तुं नरो मनुष्यः कथं क्षमः समर्थो भवतीत्यध्या
हार्यं॥ अयमभिप्रायः॥ इंद्रादयो महानुभावाः॥ अपि लौकिकानां वैदिकानां शब्दा